नामांकाः Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **30**

# P-95-Sanskritam - II

No. of Printed Pages – **7**

# प्रवेशिका परीक्षा, 2018

## संस्कृतम्

### (द्वितीय–प्रश्नपत्रम्)

समय : $3\frac{1}{4}$ होराः

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

(2) **सर्वे** प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

(5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।

## (गद्य: भाग:)

### अतिलघूत्तरात्मकाः प्रश्नाः

1. कच्छपस्य नाम किम् आसीत् ? **1**

2. मूषकराजस्य नाम किम् आसीत् ? **1**

3. ब्राह्मणः सर्पात् किं गृह्णाति ? **1**

4. सिंहेन स्वगृहम् आगच्छता कः प्राप्तः ? **1**

5. शतबुद्धिः कुत्र स्थितः ? **1**

### लघूत्तरात्मकाः प्रश्नाः

6. कच्छपस्य जलाशये अतिवृष्टिवशात् किं अभवत् ? **2**

7. ताम्रचूडः परिव्राजकः कुत्र प्रतिवसति स्म ? **2**

8. एकः ब्राह्मणः प्रतिदिनं सर्पाय किं ददाति ? **2**

9. अधोलिखितगद्ययोः कस्यचिदेकस्य सप्रसङ्गं व्याख्या कार्या – **1 + 4 = 5**

(क) अथ गच्छता कालेनाऽनावृष्टिवशात् सरः शनैः शनैः शोषमगमत् । ततस्तदुःखदुःखितौ । तावूचतुः – भो मित्र ! जम्बालशेषमेतत्सरः सञ्जातं, तत् कथं भवान् भविष्यतीति व्याकुलत्वं नो हृदि वर्तते । तच्छ्रुत्वा कम्बुग्रीव आह – 'भो साम्प्रतं नास्त्यस्माकं जीवितव्यं, जलाभावात् । तथाप्युपायः चिन्त्यतामिति ।

(ख) तयोर्मध्ये मूषकविलान्वेषणस्य वार्तां श्रुत्वा मयाऽपि चिन्तितम् – 'अहो विनष्टोऽस्मि ।' ततोऽहं भयत्रस्तमनाः सपरिवारो दुर्गमार्गं परित्यज्यान्यमार्गेण गन्तुं प्रवृत्तः । ततः सपरिजनो यावदग्रतो गच्छामि, तावत् सम्मुखीनो बृहत्कायो मार्जारः समायाति । स मूषकवृन्दमवलोक्य तन्मध्ये सहसोत्पपात ।

10. अधोलिखितगद्ययोः कस्यचिदेकस्य सप्रसंगव्याख्या कार्या – **1 + 4 = 5**

(क) अथ कदाचित् तत्र वने भ्रमन्नरण्यगजः समायातः । तं दृष्ट्वा तौ सिंहसुतौ द्वावपि कुपिताननौ तं प्रति प्रचलितौ यावत्, तावत् तेन शृगालपुत्रेणात्राभिहितम्-अहो गजोऽयं युष्मत्कुलशत्रुः । तन्न गन्तव्य-मेतस्याऽभिमुखम् । एवमुक्त्वा असौ गृहं प्रधावितः । तावपि ज्येष्ठबान्धवभङ्गात् निरुत्साहतां गतौ ।

(ख) ततो राजा मृत्यानब्रवीत् – 'भो भो ! गच्छत । सर्वान् पक्षिणः गतासून् कृत्वा शीघ्रमानयत' । राजादेशानन्तरमेव प्रचेलुस्ते । अथ लगुडहस्तान् राजपुरुषान् दृष्ट्वा तत्र एकेन पक्षिणा वृद्धेनोक्तम् – भोः स्वजनाः । न शोभनमापतितम् । ततः सर्वैः एकमतीमूय शीघ्रमुत्पतितव्यम् । तैश्च तथाऽनुष्ठितम् ।

11. **एकस्याः** कथायाः सारांशः संस्कृतभाषायां लेखनीयः । **4**

(क) काष्ठभ्रष्टकच्छपकथा ।

(ख) शतबुद्ध्यादिमत्स्यकथा ।

**पद्य भागः**

**अतिलघूत्तरात्मकाः प्रश्नाः**

12. कः कदाचित् न म्रियते ? **1**

13. सर्वे गुणाः कम् आश्रयन्ते ? **1**

14. आत्मनः बन्धुः कः ? **1**

15. महात्मनां विपदि किं प्रकृतिसिद्धम् ? **1**

16. कल्पलता इव नाना फलं कः फलति ? **1**

## लघूत्तरात्मकाः प्रश्नाः

17. नरकस्य त्रिविधं द्वारम् किं ? **2**

18. अपवित्रं तामसप्रियं च भोजनं किम् ? **2**

19. यस्य नरस्य समीपे धनं विद्यते स नरः समाजे कीदृशः मन्यते ? **2**

20. कैकेयी श्रीरामं वनगमनाय कैश्चित् शब्दैः आदिशति ? **2**

21. विश्वजित् यज्ञानन्तरं रघुः कीदृशः अभवत् ? **2**

22. अधोलिखितेषु **द्वयोः** पद्ययोः सप्रसंग व्याख्या कार्या – **1 + 2 × 2 = 6**

(क) देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।

ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ।।

(ख) भक्षयेयं विषं तीक्ष्णं पतेयमपि चार्णवे ।

नियुक्तो गुरुणा पित्रा नृपेण च हितेन च ।।

(ग) कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः ।

मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ।।

23. अधोलिखितयोः श्लोकयोः **एकस्य** सप्रसङ्गभावार्थः लेख्यः । **1 + 3 = 4**

(क) को न याति वशं लोके मुखे पिण्डेन पूरितः ।

मृदङ्गो मुखलेपेन करोति मधुर ध्वनिम् ।।

(ख) अम्भोदेतर-वारिविन्दु विमुखो मान्यः स मे चातको,

वासन्तेतर – वासरेषु च तथा वाचंयमः कोकिलः ।

गृह्णन् क्षीरमपास्य नीरमरसं हंसस्तु वन्द्यो मम,

जीवः श्लाध्यतमः स एव भुवने यस्मिन् विवेकः परः ।।

## छन्द – अलंकार – कोष-प्रश्नाः

24. अधोलिखितेषु छन्दःसु-**द्वयोः** लक्षणोदाहरणे लिखत – **1 + 1½ × 2 = 5**

(क) मालिनी

(ख) स्रग्धरा

(ग) वसन्ततिलका

25. **द्वयोः** अलंकारयोः लक्षणोदाहरणे लिखत – **1 + 1½ × 2 = 5**

(क) यमकम्

(ख) श्लेषः

(ग) विशेषोक्तिः

26. अधोलिखित – कोष – प्रश्नाः समाधेयाः **1 + 4 = 5**

(क) देवानां चत्वारि नामानि लिखत ।

(ख) अधोलिखितानां शब्दानां प्रत्येकस्य पर्यायद्वयं लिखत :

विष्णुः, कामदेवः, कात्तिकेयः, इन्द्रः ।

**शब्दरूप – धातुरूप– रचना–प्रश्नाः**

27. निर्देशानुसारं शब्दरूपाणि लिखत । **1 + 1 + 1 + 1 = 4**

(क) राम – शब्दस्य – षष्ठी – विभक्ति – एकवचनम्

(ख) लता – शब्दस्य – तृतीया – विभक्ति – एकवचनम्

(ग) अस्मद् – शब्दस्य – प्रथमा – विभक्ति – बहुवचनम्

(घ) सखि – शब्दस्य – प्रथमा – विभक्ति – एकवचनम्

28. निर्देशानुसारं धातुरूपाणि लिखत । **1 + 1 + 1 + 1 = 4**

(क) अस् – धातु – लङ्लकार – प्रथमपुरुष – एकवचनम्

(ख) वद् – धातु – लोट्लकार – मध्यमपुरुष – बहुवचनम्

(ग) दा – धातु – लृट्लकार –उत्तमपुरुष – एकवचनम्

(घ) नृत् – धातु – लट्लकार – प्रथमपुरुष – बहुवचनम्

29. कमप्येकं विषयमवलम्ब्य शतपदेषु निबन्धं लिखत । **4**

(क) स्वस्थवृत्तम्

(ख) अहिंसा परमो धर्मः

(ग) श्रीकृष्णः

30. भवान् लोमशः, राजकीय वरिष्ठ-उपाध्याय संस्कृत विद्यालय – सुभाषनगरस्य छात्रः, भगिन्याः विवाहकारणेन दिनद्वयस्य अवकाशार्थं प्रधानाचार्याय प्रार्थना-पत्रं लिखतु । 3

**अथवा**

ग्रामस्य स्वच्छतायै सरपंचमहोदयाय प्रार्थना-पत्रं लिखतु ।